## शनीश्वर स्तोत्र महामन्त्रं

अस्य श्री शनीश्वरस्तोत्र महामन्त्रस्य
काश्यप ऋषि अनुष्टुप् छन्दः शनीश्वरा देवता

शं बीजं नं शक्ति मं कीलकं
शनीश्वरप्रसादसिद्ध्यर्त्थे जपे विनियोगः

शनीश्वराय अंगुष्टाभ्यां नमः
मन्दगतये तर्ज्जनीभ्यां नमः
अधोक्षजाय मद्ध्यमाभ्यां नमः
सौराय अनामिकाभ्यां नमः
शुष्कोदराय कनिष्ठिकाभ्यां नमः
छायात्मजाय करतलकरपृष्ठाभ्यां नमः
शनीश्वराय हृदयाय नमः
मन्दगतये शिरस्से स्वाहा
अधोक्षजाय शिखायै वषट्
सौरये कवचाय हुं
शुष्कोदराय नेत्रद्वयाय वौषट्
छायात्मजाय अस्त्राय फट्
भूर्भुवस्सुवरोमिति दिक्बन्धः

### ध्यानं

चापासनो करुद्रस्तु नीलः
प्रत्यङ्मुखः काश्यपगोत्रजातः
सशूल चापेषु गदाधरो ऽ व्यात्
सौराष्ट्र देश प्रभवश्चसौरिः (1)

नीलांबरो नीलवपुः किरीटि
गृद्ध्रसनस्तो विकृताननश्च
केयूरहारादि विभूषितांगः
सदास्तुमे मन्दगति प्रसन्नः (2)

शनैश्चराय शान्तायसर्व्वाभीष्टप्रदायिने
नमः सर्व्वात्मने तुभ्यं नमो नीलांबराय च (3)

द्वादशाष्टम जन्मादि द्वितीयान्तेषुराशिषु
ये ये मे संगता दोषाः सर्व्वे नश्यन्तु वै प्रभोः (4)

**दशरथ उवाचः–**

एवं वरं तु संप्राप्य
वृष्ट रोमा स पार्थिवः (5)

रथोपस्थे तनूः स्थाप्य
भूत्वा चैव कृताञ्जलिः
ध्यात्वा सरस्वतिं देवीं
गणनाथं विनायकं (6)

राजा दशरथः स्तोत्रं
सौरेरिदमदा करोत्
नमः कृष्णाय नीलाय
शिति कण्ठनिभाय च (7)

नमो नीलमुखाब्जाय
नीलोल्पलनिभाय च
नमो नीर्मांस देहाय
दीर्घश्मश्रु जटाय च (8)

नमो विशालनेत्राय
शुष्कोदर भयानक
नमः पौरुषगात्राय
स्थूलरोम्णे नमो नमः (9)

नमो नित्यं क्षुधार्त्ताय
अतृप्तायनमो नमः

नमो दीर्घाय शुष्काय
कालदंष्ट्राय ते नमः (10)

नमस्ते घोररूपाय
दुर्निरीक्ष्याय ते नमः
नमो घोराय रौद्राय
भीषणाय कराळिने (11)

नमस्ते स्रवभक्षाय
वलीमुख नमोस्तुते
सूर्यपुत्र नमस्तेस्तु
भास्करो ऽ भयदायिने (12)

अधो दृष्टे नमस्तेस्तु
संवर्द्धक नमो नमः
नमो मन्दगते तुभ्यं
निस्त्रिंशाय नमो नमः (13)

नमो दुस्सहदेहाय
नित्य योग रताय च
ज्ञान दृष्टे नमस्तेस्तु
कश्यपात्मज सूनवे (14)

तुष्टो ददासि त्वं राज्यं
कृद्धोहरसि तत्क्षणात्
देवासुर मनुष्याश्च
सिद्धिविद्याधरोरगः (15)

त्वयावलोकिताः सर्व्वे
दैन्यमाशु व्रजन्तिते
ब्रह्माशक्रोयमश्चैव
ऋषभः सप्तसागराः (16)

राज्यभ्रष्टा भवन्तीह

तव दृष्ट्यावलोकिताः
देशाश्च नगरग्रामाः
दीपाश्च गिरयस्तथा (17)

सरितः सागरः सर्व्वे
नाशं यान्ति समूलतः
प्रसादं कुरु मे सौरे
वरदो ऽसि महाबलः (18)

एव मुक्तास्तदासौरिः
ग्रहराजो महाबलः
अब्रवीत् च शनिर्वाक्यं
हृष्टरोमा स भास्करः (19)

**शनिरुवाचः–**

मद्दिनेतु विशेषेण
स्तोत्रेणानेन पूजयेत् (20)

पूजयित्वा जपेत् स्तोत्रं
भूत्वा चैव कृताञ्जलिः
तस्य पीडां न चैवाहं
करिष्यामि कदाचनः (21)

गोचर जन्मलग्ने वा
दशास्वन्तर् दशासु च
रक्षामि सततं तस्य
पीडास्वन्य ग्रहस्य च (22)

शनीश्वर स्तोत्रं सन्पूर्णं